# ॥ श्रीमद् वाल्मीकि रामायणम्॥

## ॥ युद्ध काण्डं सर्गम् १२८॥

शिरस्यञ्जलिमादाय कैकेयीनन्दिवर्धनः।
बभाषे भरतो ज्येष्ठन् रामं सत्यपराक्रमम्॥ १॥

पूजिता मामिका माता दत्तन् राज्यमिदं मम।
तद्ददामि पुनस्तुभ्यन् यथा त्वमददा मम॥ २॥

धुरमेकाकिना न्यस्तामृषभेण बलीयसा।
किशोरवद्गुरुं भारं न वोढुमहमुत्सहे॥ ३॥

वारिवेगेन महता भिन्नः सेतुरिव क्षरन्।
दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसन्वृतम्॥ ४॥

गतिं खर इवाश्वस्य हन्सस्येव च वायसः।
नान्वेतुमुत्सहे देव तव मार्गमरिन्दम॥ ५॥

यथा च रोपितो वृक्षो जातश्चान्तर्निवेशने।
महांश्च सुदुरारोहो महास्कन्धः प्रशाखवान्॥ ६॥

शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयेत्।
तस्य नानुभवेदर्थन् यस्य हेतोः स रोप्यते॥ ७॥

एषोपमा महाबाहो त्वमर्थन् वेत्तुमर्हसि।
यद्यस्मान्मनुजेन्द्र त्वं भक्तान्भृत्यान्न शाधि हि॥ ८॥

जगदद्याभिषिक्तन् त्वामनुपश्यतु सर्वतः।
प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसं॥ ९॥

तूर्यसङ्घातनिर्घोषैः काञ्चीनूपुरनिस्वनैः।
मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व शेष्व च॥ १०॥

यावदावर्तते चक्रन् यावती च वसुन्धरा।
तावत्त्वमिह सर्वस्य स्वामित्वमभिवर्तय॥ ११॥

भरतस्य वचः श्रुत्वा रामः परपुरञ्जयः।
तथेति प्रतिजग्राह निषसादासने शुभे॥ १२॥

ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धकाः।
सुखहस्ताः सुशीघ्राश्च राघवं पर्युपासत॥ १३॥

पूर्वन् तु भरते स्नाते लक्ष्मणे च महाबले।
सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे॥ १४॥

विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः।
महार्हवसनोपेतस्तस्थौ तत्र श्रिया ज्वलन्॥ १५॥

प्रतिकर्म च रामस्य कारयामास वीर्यवान्।
लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः॥ १६॥

प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः।
आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम्॥ १७॥

ततो राघवपत्नीनान् सर्वासामेव शोभनम्।
चकार यत्नात्कौसल्या प्रहृष्टा पुत्रवत्सला॥ १८॥

ततः शत्रुघ्नवचनात्सुमन्त्रो नाम सारथिः।
योजयित्वाभिचक्राम रथन् सर्वाङ्गशोभनम्॥ १९॥

अर्कमण्डलसङ्काशन् दिव्यं दृष्ट्वा रथन् स्थितम्।
आरुरोह महाबाहू रामः सत्यपराक्रमः॥ २०॥

सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती।
स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ॥ २१॥

सर्वाभरणजुष्टाश्च ययुस्ताः शुभकुण्डलाः।
सुग्रीवपत्न्याः सीता च द्रष्टुं नगरमुत्सुकाः॥ २२॥

अयोध्यायान् तु सचिवा राज्ञो दशरथस्य च।
पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत्॥ २३॥

अशोको विजयश्चैव सिद्धार्थश्च समाहिताः।
मन्त्रयन्रामवृद्ध्यर्थन् वृत्त्यर्थं नगरस्य च॥ २४॥

सर्वमेवाभिषेकार्थन् जयार्हस्य महात्मनः।
कर्तुमर्हथ रामस्य यद्यन्मङ्गलपूर्वकम्॥ २५॥

इति ते मन्त्रिणः सर्वे सन्दिश्य तु पुरोहितम्
नगरान्निर्ययुस्तूर्णन् रामदर्शनबुद्धयः॥ २६॥

हरियुक्तन् सहस्राक्षो रथमिन्द्र इवानघः।
प्रययौ रथमास्थाय रामो नगरमुत्तमम्॥ २७॥

जग्राह भरतो रश्मीञ्शत्रुघ्नश्छत्रमाददे।
लक्ष्मणो व्यजनन् तस्य मूर्ध्नि सम्पर्यवीजयत्॥ २८॥

श्वेतन् च वालव्यजनन् सुग्रीवो वानरेश्वरः।
अपरन् चन्द्रसङ्काशन् राक्षसेन्द्रो विभीषणः॥ २९॥

ऋषिसङ्घैर्तदाकाशे देवैश्च समरुद्गणैः।
स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः॥ ३०॥

ततः शत्रुञ्जयं नाम कुञ्जरं पर्वतोपमम्।
आरुरोह महातेजाः सुग्रीवो वानरेश्वरः॥ ३१॥

नवनागसहस्राणि ययुरास्थाय वानराः।
मानुषन् विग्रहन् कृत्वा सर्वाभरणभूषिताः॥ ३२॥

शङ्खशब्दप्रणादैश्च दुन्दुभीनान् च निस्वनैः।
प्रययू पुरुषव्याघ्रस्तां पुरीन् हर्म्यमालिनीम्॥ ३३॥

ददृशुस्ते समायान्तन् राघवं सपुरःसरम्।
विराजमानन् वपुषा रथेनातिरथन् तदा॥ ३४॥

ते वर्धयित्वा काकुत्स्थन् रामेण प्रतिनन्दिताः।
अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम्॥ ३५॥

अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः।
श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः॥ ३६॥

स पुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः।
प्रव्याहरद्भिर्मुदितैर्मङ्गलानि ययौ वृतः॥ ३७॥

अक्षतन् जातरूपं च गावः कन्यास्तथा द्विजाः।
नरा मोदकहस्ताश्च रामस्य पुरतो ययुः॥ ३८॥

सख्यन् च रामः सुग्रीवे प्रभावं चानिलात्मजे।
वानराणान् च तत्कर्म व्याचचक्षेथ मन्त्रिणाम्॥ ३९॥

श्रुत्वा च विस्मयन् जग्मुरयोध्यापुरवासिनः।
वानराणां च तत्कर्म राक्षसानां च तद्बलम्॥ ४०॥

विभीषणस्य संयोगमाचचक्षेऽथ मन्त्रिणाम्।
द्युतिमानेतदाख्याय रामो वानरसन्वृतः॥
हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश ह। ४१॥

ततो ह्यभ्युच्छ्रयन्पौराः पताकास्ते गृहे गृहे॥
ऐक्ष्वाकाध्युषितन् रम्यमाससाद पितुर्गृहम्। ४२॥

अथाब्रवीद्राजपुत्रो भरतं धर्मिणां वरम्॥
अर्थोपहितया वाचा मधुरं रघुनन्दनः। ४३॥

पितुर्भवनमासाद्य प्रविश्य च महात्मनः॥
कौसल्यान् च सुमित्रां च कैकेयीं चाभ्यवादयत्। ४४॥

तच्च मद्धवनन् श्रेष्ठं साशोकवनिकं महत्॥
मुक्तावैदूर्यसङ्कीर्णन् सुग्रीवस्य निवेदय। ४५॥

तस्य तद्वचनन् श्रुत्वा भरतः सत्यविक्रमः॥
हस्ते गृहीत्वा सुग्रीवं प्रविवेश तमालयम्। ४६॥

ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च॥
गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः। ४७॥

उवाच च महातेजाः सुग्रीवन् राघवानुजः॥
अभिषेकाय रामस्य दूतानाज्ञापय प्रभो। ४८॥

सौवर्णान्वानरेन्द्राणान् चतुर्णां चतुरो घटान्॥
ददौ क्षिप्रन् स सुग्रीवः सर्वरत्नविभूषितान्। ४९॥

यथा प्रत्यूषसमये चतुर्णान् सागराम्भसाम्॥
पूर्णैर्घटैः प्रतीक्षध्वन् तथा कुरुत वानराः। ५०॥

एवमुक्ता महात्मानो वानरा वारणोपमाः॥
उत्पेतुर्गगनन् शीघ्रन् गरुडा इव शीघ्रगाः। ५१॥

जाम्बवांश्च हनूमांश्च वेगदर्शी च वानरः॥
ऋषभश्चैव कलशाञ्जलपूर्णानथानयन्। ५२॥

नदीशतानां पञ्चानान् जले कुम्भैरुपाहरन्॥ ५३॥

पूर्वात्समुद्रात्कलशन् जलपूर्णमथानयत्।

सुषेणः सत्त्वसम्पन्नः सर्वरत्नविभूषितम्॥ ५४॥

ऋषभो दक्षिणात्तूर्णन् समुद्राज्जलमाहरत्।
रक्तचन्दनकर्पूरैः सन्वृतन् काञ्चनं घटम्॥ ५५॥

गवयः पश्चिमात्तोयमाजहार महार्णवात्।
रत्नकुम्भेन महता शीतं मारुतविक्रमः॥ ५६॥

उत्तराच्च जलन् शीघ्रन् गरुडानिलविक्रमः।
आजहार स धर्मात्मा नलः सर्वगुणान्वितः॥ ५७॥

ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम्।
अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह॥
पुरोहिताय श्रेष्ठाय सुहृद्भ्यश् च न्यवेदयत्। ५८॥

ततः स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैः सह॥
रामन् रत्नमयो पीठे सहसीतं न्यवेशयत्। ५९॥

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः॥
कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा। ६०॥

अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना॥
सलिलेन सहस्राक्षन् वसवो वासवं यथा। ६१॥

ऋत्विग्भिर्ब्राह्मणैः पूर्वन् कन्याभिर्मन्त्रिभिस्तथा॥
योधैश्चैवाभ्यषिञ्चन्स्ते सम्प्रहृष्टाः सनैगमैः। ६२॥

सर्वौषधिरसैश्चापि दैवतैर्नभसि स्थितैः॥
चतुर्हिर्लोकपालैश्च सर्वैर्देवैश्च सङ्गतैः। ६३॥

ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम्॥
अभिषिक्तः पुरा येन मनुस्तं दीप्ततेजसम्। ६४॥

तस्यान्ववाये राजानः क्रमाद्येनाभिषेचिताः॥
सभायां हेमक्लृप्तायां शोभितायां महाधनैः। ६५॥

रत्नैर्नानाविधैश्चैव चित्रितायां सुशोभनैः॥
नानारत्नमये पीठे कल्पयित्वा यथाविधि। ६६॥

किरीटेन ततः पश्चाद्वसिष्ठेन महात्मना॥
ऋत्विग्भिर्भूषणैश्चैव समयोक्ष्यत राघवः। ६७॥

छत्रं तस्य च जग्राह शत्रुघ्नः पाण्डुरन् शुभम्॥
श्वेतन् च वालव्यजनन् सुग्रीवो वानरेश्वरः। ६८॥

अपरन् चन्द्रसङ्काशन् राक्षसेन्द्रो विभीषणः॥ ६९॥

मालान् ज्वलन्तीन् वपुषा काञ्चनीं शतपुष्कराम्।
राघवाय ददौ वायुर्वासवेन प्रचोदितः॥ ७०॥

सर्वरत्नसमायुक्तं मणिरत्नविभूषितम्।
मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः॥ ७१॥

प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरो गणाः।

अभिषेके तदर्हस्य तदा रामस्य धीमतः॥ ७२॥

भूमिः सस्यवती चैव फलवन्तश्च पादपाः।
गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे॥ ७३॥

सहस्रशतमश्वानान् धेनूनां च गवां तथा।
ददौ शतन् वृषान्पूर्वन् द्विजेभ्यो मनुजर्षभः॥ ७४॥

त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः।
नानाभरणवस्त्राणि महार्हाणि च राघवः॥ ७५॥

अर्करश्मिप्रतीकाशान् काञ्चनीं मणिविग्रहाम्।
सुग्रीवाय स्रजन् दिव्यां प्रायच्छन्मनुजर्षभः॥ ७६॥

वैदूर्यमणिचित्रे च वज्ररत्नविभूषिते।
वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ॥ ७७॥

मणिप्रवरजुष्टन् च मुक्ताहारमनुत्तमम्।
सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम्॥
अरजे वाससी दिव्ये शुभान्याभरणानि च। ७८॥

अवेक्षमाणा वैदेही प्रददौ वायुसूनवे॥
अवमुच्यात्मनः कण्ठाद्धारन् जनकनन्दिनी। ७९॥

अवैक्षत हरीन्सर्वान्भर्तारन् च मुहुर्मुहुः॥ ८०॥

तामिङ्गितज्ञः सम्प्रेक्ष्य बभाषे जनकात्मजाम्।

प्रदेहि सुभगे हारन् यस्य तुष्टासि भामिनि॥ ८१॥

तेजो धृतिर्यशो दाक्ष्यं सामर्थ्यं विनयो नयः।
पौरुषन् विक्रमो बुद्धिर्यस्मिन्नेतानि नित्यदा॥ ८२॥

ददौ सा वायुपुत्राय तन् हारमसितेक्षणा।
हनूमान्स्तेन हारेण शुशुभे वानरर्षभः॥
चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाचलः। ८३॥

सर्वे वानरवृद्धाश्च ये चान्ये वानरोत्तमाः॥
वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः। ८४॥

ततो द्विविद मैन्दाभ्यां नीलाय च परन्तपः॥
सर्वान्कामगुणान्वीक्ष्य प्रददौ वसुधाधिपः। ८५॥

विभीषणोऽथ सुग्रीवो हनुमान् जाम्बवांस्तथा॥
सर्ववानरवृद्धाश्च रामेणाक्लिष्टकर्मणा। ८६॥

यथार्हं पूजिताः सर्वे कामै रत्नैश्च पुष्कलैर्॥
प्रहृष्टमनसः सर्वे जग्मुरेव यथागतम्। ८७॥

नत्वा सर्वे महात्मानस्ततस्ते वानरर्षभाः॥
विसृष्टाः पार्थिवेन्द्रेण किष्किन्धां समुपागमन्। ८८॥

सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनम्॥
पूजितश्चैव रामेण किष्किन्धां प्राविशत्पुरीम्। ८९॥

विभीषणोऽपि धर्मात्मा सह रैनैर्नैऋतर्षभैः॥
लब्ध्वा कुलधनं राजा लङ्कां प्रायान् महायशाः। ९०॥

स राज्यमखिलं शासन्निहतारिर्महायशाः॥
राघवः परमोदारः शशास परया मुदा। ९१॥

उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः॥ ९२॥

आतिष्ठ धर्मज्ञ मया सहेमां।
गां पूर्वराजाध्युषितां बलेन।
तुल्यं मया त्वं पितृभिर्धृता या।
तां यौवराज्ये धुरमुद्वहस्व॥ ९३॥

सर्वात्मना पर्यनुनीयमानो।
यदा न सौमित्रिरुपैति योगम्।
नियुज्यमानोऽ पि च यावराज्ये
ततोऽभ्यषिञ्चद्भरतं महात्मा॥ ९४॥

पौण्डरीकाश्वमेधाभ्यान् वाजपेयेन चासकृत्।
अन्यैश्च विविधैर्यज्ञैरयजत्पार्थिवर्षभः॥ ९५॥

राज्यन् दशसहस्राणि प्राप्य वर्षाणि राघवः।
शताश्वमेधानाजह्रे सदश्वान्भूरिदक्षिणान्॥ ९६॥

आजानुलम्बिबाहुश्च महास्कन्धः प्रतापवान्।
लक्ष्मणानुचरो रामः पृथिवीमन्वपालयत्॥ ९७॥

राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम्।
ईजे बहुविधैर्यज्ञैः ससुतभ्रातृबान्धवः॥ ९८॥

न पर्यदेवन्विधवा न च व्यालकृतं भयम्।
न व्याधिजं भयन् वापि रामे राज्यं प्रशासति॥ ९९॥

निर्दस्युरभवल्लोको नानर्थः कन् चिदस्पृशत्।
न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते॥ १००॥

सर्वं मुदितमेवासीत्सर्वो धर्मपरोभवत्।
राममेवानुपश्यन्तो नाभ्यहिन्सन्परस्परम्॥ १०१॥

आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः।
निरामया विशोकाश्च रामे राज्यं प्रशासति॥ १०२॥

रामो रामो राम इति प्रजानामभवन् कथाः।
रामभूतं जगाभूद्रामे राज्यं प्रशासति॥ १०३॥

नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः।
कालवर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः॥ १०४॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः।
स्वकर्मसु प्रवर्तन्ते तुष्ठाः स्वैरेव कर्मभिः॥
आसन् प्रजा धर्मपरा रामे शासति नानृताः। १०५॥

सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः॥
दशवर्षसहस्राणि रामो राज्यमकारयत्। १०६॥

धर्मयं यशस्यमायुष्यं राज्ञां च विजावहम्॥
आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम्। १०७॥

पठेद्यः शृणुयाल्लोके नरः पापात्प्रमुच्यते॥ १०८॥

पुत्रकामश्च पुत्रान्वै धनकामो धनानि च।
लभते मनुजो लोके श्रुत्वा रामाभिषेचनम्॥
महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति। १०९॥

राघवेण यथा माता सुमित्रा लक्ष्मणेन च॥
भरतेन च कैकेयी जिवपुत्रास्तथा स्त्रियः। ११०॥

भविष्यन्ति सदानन्दाः पुत्रपौत्रसमन्विताः॥ १११॥

श्रुत्वा रामायणमिदं दीर्घमायिश्च विन्दति।
रामस्य विजयं चैव सर्वमक्लिष्ठकर्मणः॥ ११२॥

शृणोति य इत्दं काव्यं पुरा वाल्मीकिना कृतम्।
श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ॥ ११३॥

समागम्य प्रवासान्ते रमन्ते सह बान्धवैः।
शृण्वन्ति य इदं काव्यं पुरा वाल्मीकिना कृतम्॥ ११४॥

ते प्रार्थितान् वरान् सर्वान् प्राप्नुवन्तीह राघवात्।
श्रवणेन सुराः सर्वे प्रीयन्ते संप्रशृण्वताम्॥ ११५॥

विनायकाश्च शाम्यन्ति गृहे तिष्ठन्ति यस्य वै।

विजयेत महीं राजा प्रवासि स्वस्तिमान् भवेत्॥ ११६॥

स्त्रियो रजस्वलाः श्रुत्वा पुत्रान् सूयुरनुत्तमान्।
पूजयंश्च पठंश्चनमितिहासं पुरातनम्॥ ११७॥

प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्विजात्॥
ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः। ११८॥

रामायणमिदं कृत्स्नं श्रृण्वतः पठतः सदा॥ ११९॥

प्रीयते सततं रामः सहि मिष्णुः सनातनः।
आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः॥
साक्षाद्रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते। १२०॥

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः॥
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्। १२१॥

देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात्तथा॥
रामायणस्य श्रवणे तुष्यन्ति पितरः सदा। १२२॥

भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम्॥
ये लिखन्तीह च नरास्तेषां वासस्त्रिविष्टपे। १२३॥

कुटुम्बवृद्धिं धनधान्यवृद्धिं।
स्त्रियश्च मुख्याह् सुखमुत्तमं च।
श्रुत्वा शुभं काव्यमिदं महार्थं।
प्राप्नोति सर्वां भुवि चार्थसिद्धिम्॥ १२४॥

आयुष्यमारोग्यकरं यशस्यं।
सौभ्रातृकं बुद्धिकरं शुभं च।
श्रोतव्यमेतन्नियमेन सद्भिः।
राख्यानमोजस्करमृद्धिकामैः॥ १२५॥

**॥ इति युद्ध काण्डं सर्गम् १२८॥**